# Vichitra Charita Stotram

# વિચિત્રચરિતસ્તોત્રમ્

## Document Information

Text title : Vichitracharita Stotram

File name : vichitracharitastotram.itx

Category : shiva, ApaTIkara

Location : doc_shiva

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

# વિચિત્રચરિતસ્તોત્રમ્

(વસન્તતિલકા)

ભિક્ષાચરોઽપિ જગતામધિપોઽસિ ભિક્ષો
 કણ્ઠે વિષં તવ તથાપ્યમૃતપ્રદસ્ત્વમ્ ।
સ્થાણુસ્તથાપિ ભજતાં ફલદોઽસિ નિત્યં
 તુભ્યં વિચિત્રચરિતાય નમો નમસ્તે ॥ ૧॥

શમ્ભો ભવોઽસિ હિ તથાપિ ભવાન્તકસ્ત્વં
 કામાન્તકોઽપિ શરણાગત-કામદસ્ત્વમ્ ।
યોગીન્દ્ર-પૂજિત વિભોઽસિ નટેશ્વરસ્ત્વં
 તુભ્યં વિચિત્રચરિતાય નમો નમસ્તે ॥ ૨॥

ત્વં નિર્મલોઽસિ હિ તથાપિ દધાસિ ભાલે
 કાલાઙ્કિતાં શશિકલાં રમણીયમૂર્તિમ્ ।
તત્રૈવ ચાપિ નયને વહસિ ત્વમગ્નિં
 તુભ્યં વિચિત્રચરિતાય નમો નમસ્તે ॥ ૩॥

હસ્તે તવાસ્તિ હર ભીતિકરસ્ત્રિશૂલ-
 સ્તાપત્રયં હરસિ તેન વિભો નરાણામ્ ।
પાપં ચ નાશયસિ મસ્તકગાઙ્ગવારા
 તુભ્યં વિચિત્રચરિતાય નમો નમસ્તે ॥ ૪॥

દેહે તવાસ્તિ શવદેહવિભૂતિલેપઃ
 શમ્ભોસ્તથાપિ જનભૂતિકરઃ પ્રભો ત્વમ્ ।
ભોગીન્દ્ર-ભૂષણ સદાઽભયદોઽસિ દેવ
 તુભ્યં વિચિત્રચરિતાય નમો નમસ્તે ॥ ૫॥

કણ્ઠે ધૃતાસ્તિ નરમુણ્ડકપાલમાલા
 પાવિત્ર્યમૂર્તિરસિ રુદ્ર તથાપિ ભોસ્ત્વમ્ ।
દૃષ્ટિઃ સમાઽસ્તિ વિષમેક્ષણ લોકનાથ

    તુભ્યં વિચિત્રચરિતાય નમો નમસ્તે ॥ ૬॥

યજ્ઞપ્રિયોઽપિ ભગવન્નસિ યજ્ઞનાશી
    વૈરાગ્યમૂર્તિરપિશઙ્કર સાનુરાગઃ ।
યક્ષાધિપસ્તવ સખાસ્તિ તથાપિ ભિક્ષુ-
    સ્તુભ્યં વિચિત્રચરિતાય નમો નમસ્તે ॥ ૭॥

વૃદ્ધો વૃષો વહનમસ્તિ તવાષ્ટમૂર્તે
    પાદારવિન્દનમનાય તથાપિ શક્રઃ ।
ઐરાવતાદવનિમેત્ય વિનમ્ર આસ્તે
    તુભ્યં વિચિત્રચરિતાય નમો નમસ્તે ॥ ૮॥

સ્તોત્રં વિચિત્રચરિતસ્ય શિવસ્ય પ્રાત-
    ર્ભક્ત્યા સ્મરેદહરહઃ શુચિમાનસો યઃ ।
તાપત્રયં જગતિ તસ્ય વિનાશ્ય શમ્ભુઃ
    કીર્તિં ધનં ચ વિપુલં પ્રદદાતિ તસ્મૈ ॥ ૯॥

ઇતિ શ્રી આપટીકરવિરચિતં વિચિત્ર-ચરિત-સ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

*Vichitra Charita Stotram*

pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*